# Pitrugitam

# પિતૃગીતમ્

## Document Information

Text title : pitRigItam

File name : pitRigItam.itx

Category : gItam, giitaa

Location : doc_giitaa

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : May 18, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

Pitrugitam

# પિતૃગીતમ્

માર્કણ્ડેય ઉવાચ
અપિ ધન્યઃ કુલે જાયાદસ્માકં મતિમાન્નરઃ ।
અકુર્વન્ વિત્તશાઠ્યં યઃ પિણ્ડાન્નો નિર્વપિષ્યતિ ॥ ૧॥ ૫૦
રત્નવસ્ત્રમહાયાનં સર્વતોયાદિકં વસુ ।
વિભવે સતિ વિપ્રેભ્યઃ અસ્માનુદ્દિશ્ય દાસ્યતિ ॥ ૨॥ ૫૧
અન્નેન વાન્યથાશક્ત્યા કાલેઽસ્મિન્ ભક્તિનમ્રધીઃ ।
ભોજયિષ્યતિ વિપ્રાગ્ર્યાંસ્તન્માત્રવિભવો નરઃ ॥ ૩॥ ૫૨
અસમર્થોઽન્નદાનસ્ય વન્યશાકં સ્વશક્તિતઃ ।
પ્રદાસ્યતિ દ્વિજાગ્ર્યેભ્યઃ સ્વલ્પાં યો વાપિ દક્ષિણામ્ ॥ ૪॥ ૫૩
તત્રાપ્યસામર્થ્યયુતઃ કરૈર્ગૃહ્યાસિતાંસ્તિલાન્ ।
પ્રણમ્ય દ્વિજમુખ્યાય કસ્મૈચિદપિ દાસ્યતિ ॥ ૫॥ ૫૪
તિલૈસ્સપ્તાષ્ટભિર્વાપિ સમવેતં જલાઞ્જલિમ્ ।
ભક્તિનમ્રઃ સમુદ્દિશ્ય યોઽસ્માકં સમ્પ્રદાસ્યતિ ॥ ૬॥ ૫૫
યતઃ કુતશ્ચિત્સમ્પ્રાપ્ય ગોભ્યો વાપિ ગવાહ્નિકમ્ ।
અભાવે પ્રીણયેત્તસ્માદ્ભક્ત્યા યુક્તઃ પ્રદાસ્યતિ ॥ ૭॥ ૫૬
સર્વાભાવે વનં ગત્વા કક્ષમૂલપ્રદર્શકઃ ।
સૂર્યાદિલોકપાલાનામિદમુચ્ચૈઃ પઠિષ્યતિ ॥ ૮॥ ૫૭
ન મેઽસ્તિ વિત્તં ન ધનં ન ચાન્યચ્છ્રાદ્ધસ્ય યોગ્યં સ્વપિતૄન્નતોઽસ્મિ ।
તૃપ્યન્તુ ભક્ત્યા પિતરૌ મયૈતૌ ભુજૌ તતૌ વર્ત્મનિ મારુતસ્ય ॥ ૯॥ ૫૮
ઇત્યેવં પિતૃભિર્ગીતં ભાવાભાવપ્રયોજનમ્ ।
કૃતં તેન ભવેચ્છ્રાદ્ધં ય એવં કુરુતે દ્વિજઃ ॥ ૧૦॥ ૫૯
ઇતિ વરાહપુરાણે આદિકૃતવૃત્તાન્તે શ્રાદ્ધકલ્પો નામ ત્રયોદશોઽધ્યાયઃ
પિતૃગીતં સમાપ્તમ્ ।

Shlokas 50 to 59 from https://archive.org/details/VarahaPurana PDF page 56

Encoded and proofread by PSA Easwaran

*Pitrugitam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*